# अद्वैतवेदान्तदर्शनानुसारं श्रवणमनननिदिध्यासनस्वरूपविमर्शः

(advaitavedāntadarśanānusāraṃ
śravaṇamanananididhyāsanasvarūpavimarśaḥ)

"A Critical Study of Śravaṇa, Manana and Nididhyāsana
in the Light of Advaita Vedānta Philosophy"

रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने संस्कृते
PhD इत्युपाधिलाभाय समर्प्यमाणलघुशोधप्रवन्धः

Dissertation submitted for the degree of PhD (Sanskrit) to
Ramakrishna Mission Vivekananda Educational and Research Institute


**अनुसन्धाता - राजेशः अधिकारी**
**अनुक्रमाङ्कः - B2050004**
शोधच्छात्रः, संस्कृतदर्शनविभागे
संस्कृतदर्शनविभागे
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

**मार्गदर्शकः - डॉ शन्तनुः अयाचित्**
**अध्यापकः**
संस्कृतदर्शविभागे
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य



रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्

(मानितविश्वविद्यालयः)

बेलुडमठः, हावडा – ७११२०२, पश्चिमबङ्गाः, शिक्षावर्षम् - २०२०-२०२५


Rajesh Adhikari
25.11.25.

# अद्वैतवेदान्तदर्शनानुसारं श्रवणमनननिदिध्यासनस्वरूपविमर्शः

**"A Critical Study of Śravaṇa, Manana and Nididhyāsana in the Light of Advaita Vedānta Philosophy"**

राजेशः अधिकारी
शोधच्छात्रः
रामकृष्णमिशन्-विवेकानन्दशैक्षणिक-शोधसंस्थानम्
बेलुडमठः, हावड़ा, ७११२०२

## शोधसारः

सत्सु बहुषु वेदान्तसम्प्रदायेषु, अद्वैतसम्प्रदायस्य हि महान् आदरः बुधजनेषु। कथमिति चेत् जीवनस्य परमार्थस्वरूपज्ञानं हि सर्वेषां नः चिकीर्षितम्, तस्य श्रुतियुक्त्यादिभिः विश्लेषणेन स्वरूपप्रतिपत्तये अद्वैतवेदान्तस्य महान् वर्तते प्रयत्नविशेषः। अस्माकं चित्तवृत्तिरनुक्षणमितस्ततः विक्षिप्ता भवति, मनसः ऐकाग्र्यं नैव सम्पाद्यते। तदर्थमेव दिक्षु जायते राष्ट्रस्य इतरराष्ट्रैः सह संग्रामः, धनापचितिः, अस्मद्धानिः देशक्षतिश्च। कस्तर्हि प्रतीकारः इति चेत् मनसः शान्तिविधानम्। जगत्स्रष्ट्रा सह अस्माकं कः सम्बन्धः, मुक्तिस्वरूपम्, समाधिप्रतिपत्तिः, यमाद्यभ्यासः इत्यादीनां ज्ञानपूर्वकानुशीललनादिपुरःसरं वर्तमानमनुजानां यत् महत् प्रयोजनं मनसः शान्तिविधानम् – तत् कारयति अयं वेदान्तसम्प्रदायः। तदर्थमेव ध्यानोपदेशः, जपोपदेशः, भगवच्चिन्तनेन मनसः कालुष्यापगमोपदेशः, तदर्थमेव च श्रवणस्य मननस्य निदिध्यासनस्य च कर्तव्यतोपदेशः। एतेन किं प्राप्तमिति चेत् श्रवणमनननिदिध्यासनानि शास्त्रविधानानुसारं यथाशक्ति यदि अनुष्ठीयन्ते अस्माभिः, तर्हि मनसः शान्तिविधानम्, पवित्रजीवननिर्वाहः, सत्सङ्गतिः, किं बहुना आत्मज्ञानमपि सुकरं भवति। अत एव अस्मिन् शोधप्रबन्धे मया अद्वैतवेदान्तदर्शनानुसारं श्रवणमनननिदिध्यासनानां स्वरूपविमर्शाय प्रयत्नो विहितोऽस्ति।

एवञ्च "अद्वैतवेदान्तदर्शनानुसारं श्रवणमनननिदिध्यासनस्वरूपविमर्शः" ("A Critical Study of Śravaṇa, Manana and Nididhyāsana in the Light of Advaita Vedānta Philosophy") इति शीर्षकाङ्कितो मदीयशोधप्रबन्धविषयः। शोधग्रन्थस्य विश्लेषणात्मकत्वात् प्रकृतविषयमधिकृत्य सूक्ष्मातिसूक्ष्माणां विषयाणां विस्तारेण पर्यालोचनं विहितम् अत्र। विश्लेषणात्मके ह्यध्ययने आदौ विषयस्य खण्डशः विभागः कर्तव्यः, येन भिन्नभिन्नरूपेण समेषां व्याख्याने सौकर्यं भवति। तस्मात् आदौ पृथग्रूपेण श्रवणादीनाम् आत्मज्ञानसाधनानां विमर्शः विहितः। ततश्च कार्यकारणानुसन्धानं कर्तव्यम्, तस्मात् श्रवणमनननिदिध्यासनानाम् अङ्गाङ्गिभावविचारः अत्र उपस्थापितः। ततश्च श्रवणादीनां विधिविचारादिना वैशिष्ट्यविश्लेषणरूपः विश्लेषणात्मकाध्ययनस्य नियमः अपि परिपालितः। अन्ते च युक्तिपूर्वकं सिद्धान्तः अपि वर्णनीयः इति नियमात् प्रत्यध्यायम् अन्तिमे निष्कर्षः सयुक्ति प्रतिपादितः।

केवलम् अद्वैतवेदान्तमूलकतया एव श्रवणादीनां स्वरूपविश्लेषणं कथं विहितमिति चेत् प्रथमतस्तु ग्रन्थकलेवरविस्तरभयात् वेदान्तस्य सर्वसम्प्रदायानुसारं व्याख्यानं न विहितम्, द्वितीयतस्तु मया सिद्धान्तपक्षत्वेन अद्वैतमतमेव समाश्रितमिति हेतोः अद्वैतपरकतया एव व्याख्यानं विहितम्। तेन नेदं सिद्ध्यति यत् इतरवेदान्तसम्प्रदायानां मतमत्र नैव विचारितम्, क्वचित् प्रयोजनानुसारम् इतरमतानि अपि व्याख्यातानि। विश्लेषणात्मकेऽस्मिन् गवेषणकार्ये मया प्रत्यध्यायमन्ते समेषां मतानां परीक्षणेन निष्कर्षः प्रत्यपादि। प्रकृतविषयम् अधिकृत्य तथ्यसंग्रहावसरे मया अपेक्षानुसारं प्रस्थानत्रय्याः चिता अंशाः सभाष्यम् अधीताः, समञ्च अद्वैतसिद्धिः, सिद्धान्तलेशसंग्रहः, तत्त्वप्रदीपिका, इत्यादीनां विचारमूलकानां बहूनाम् अद्वैतपरकग्रन्थानां प्रयोजनानुगुण्येन विस्तारेण अध्ययनं विहितम्। बुद्धिशुद्ध्यै इतरसम्प्रदायमतानि अपि क्वचित् क्वचित् अधीतानि।

अस्मिन् ग्रन्थे मुख्यरूपेण अष्टौ अध्यायाः सन्ति, उपोद्घातस्य उपसंहारस्य च मुख्याध्यायत्वेन प्रकल्पना न कृता। प्रथमाध्यायस्य आरम्भात् प्राक् प्रकृतगवेषणस्य किमुद्देश्यम्, कियती परिमितिः, ग्रन्थकायः, गवेषणस्य फलम् इत्येतत् सर्वं सविस्तरम् आलोचितम्। ततश्च उपोद्घाते अनुबन्धादिकं निर्दिश्य प्रथमाध्याये आत्मज्ञानस्य साधनानि कानि श्रुत्यादिषु उपदिष्टानि इति मन्त्राद्युल्लेखपुरःसरं समासतो विचारितम्। तत्र च नित्यकाम्यादीनि कर्माणि कथं ज्ञानसाधनानि, आत्मसाक्षात्कारे करणत्वं कस्य, सद्बुद्धि-सत्य-प्रसंख्यानादीनां करणत्वप्रसङ्गोऽपि प्रतिपादितः। द्वितीये ह्यध्याये बहुभिः ग्रन्थकृद्भिः समुपदिष्टानि आत्मज्ञानसाधनभूतानां श्रवणमनननिदिध्यासनानां लक्षणानि समाकुञ्च्य तेषां विस्तारेण पदशः विचारो विहितः, ततश्च तेषां विचारेण कथमेतानि उपादेयानि इति प्रतिपादितम्। तृतीये चाध्याये प्रस्थानत्रयीम् अन्विष्य श्रवणादीनां निष्कृष्टार्थः प्रतिपादितः, अद्वैतेतरदर्शनेषु च कथम् आत्मज्ञानसाधनानि प्रतिपादितानि इति विमृष्टम्। चतुर्थे अध्याये निदिध्यासनस्य समाध्यर्थपर्यवसानत्वात् समाधेः विषये उत्तरमीमांसा-योगादिदर्शनस्वारस्येन विचारः प्रस्तुतः, समञ्च ध्यानं कथं कर्तव्यम्, जपाभ्यासः कथं साधनीयः, कुण्डलिनीशक्तेः जागरणं कथं कर्तुं शक्यते, अद्वैतिनः योगसिद्धान्तं कथं स्वीकुर्युः इत्यादिविषया अपि प्रदर्शिताः। पञ्चमेऽध्याये श्रवणादिषु विधिर्वर्तते न वेति विषयः विस्तारेण प्रतिपादितः, तत्र च अविधित्वपक्षोऽपि विचारितः। षष्टेऽध्याये श्रवणमनननिदिध्यासनानां परस्परम् अङ्गाङ्गिभावः विचारितः। सप्तमे त्वध्याये श्रवणमनननिदिध्यासनैः कथं तत्त्वज्ञानी वेदान्तप्रदर्शितया सरण्या आत्मज्ञानाभिमुखी भवेत् इति प्रतिपादितम्, आनुषङ्गिकरूपेण अद्वैतसम्प्रदायस्य मुख्यानि कानिचन मतानि अपि आलोचितानि सन्ति। अन्तिमे चाष्टमेऽध्याये आश्रमभेदेन श्रवणाद्यभ्यासे भेदो वर्तते न वेति विषयः आलोचितः। एवंरूपेण अष्टौ अध्यायाः व्याख्याताः। ततश्च उपसंहारभागे सम्पूर्णस्य प्रबन्धस्य सारः, प्रकृतविषये अग्रिमगवेषणसम्भावना वर्तते न वेति विषये आलोचितः। तदनु परिशिष्टभागे ग्रन्थोद्धृतोपनिषद्वचनसंग्रहः, प्रबन्धोल्लिखितश्लोकसंग्रहः, प्रबन्धोल्लिखितसूत्रसंग्रहः, प्रबन्धप्रयुक्तपारिभाषिकशब्दार्थकोषः, आश्रितग्रन्थसूची चेत्येते संगृहीताः पाठकसौकर्यार्थमिति शिवम्।

***